## नवमः पाठः

### नीलशृगालः



कस्मिंश्चिद् अरण्ये एकः शृगालः प्रतिवसति स्म। स एकदा स्वेच्छया नगरोपान्ते भ्रमन् कुक्कुरेभ्यो भीतः रजकस्य नीलभाण्डे पतितः। ततोऽसौ वनं गत्वा आत्मानं नीलवर्णमवलोक्य अचिन्तयत्- अहम् इदानीम् उत्तमवर्णः, तदाहं स्वकीयोत्कर्षं किं न साधयामि? इत्यालोच्य शृगालान् आहूय स उक्तवान्-'मां भगवती वनदेवता स्वहस्तेन अरण्यराज्ये अभिषिक्तवती। तदद्यारभ्य अरण्ये अस्मदाज्ञया व्यवहारः कार्यः। शृगालाश्च तं विशिष्टवर्णम् अवलोक्य प्रणम्य अवदन्- 'यथा आज्ञापयति देव! इत्यनेनैव सर्वे क्रमेण अरण्यवासिनः तस्य आधिपत्यं स्वीकृतवन्तः।शनैः शनैः स व्याघ्र-सिंहादीन् उत्तमजनान् प्राप्य स्वजातीयान् दूरीकृतवान्। ततो दुःखितान् शृगालान् अवलोक्य केनचिद् वृद्धशृगालेन एतत्प्रतिज्ञातम्- यथा अयं व्याघ्रादिभिः परिचितो भवेत् तथा उपायं करिष्यामः। यतः एते व्याघ्रादयः अस्य वर्णमात्रेण विप्रलब्धाः सन्तः एनं शृगालम् अज्ञात्वा राजानं मन्यन्ते। ततः सायंकाले सर्वे तत्र सम्मिल्य एकदैव महारावम् अकुर्वन्। तं शब्दं श्रुत्वा स नीलशृगालोऽपि जातिस्वभावात् तैः सह शब्दम् अकरोत्। तथा कृते सति सिंहैः स ज्ञातः हतश्च। यतः-

**यः स्वभावो हि यस्यास्ति स नित्यं दुरतिक्रमः।**

**शब्दार्थः**

**कस्मिंश्चिद्** = किसी **अरण्ये** = जंगल में **भ्रमन्** = घूमता हुआ **भीतः** = डरा हुआ **रजकस्य** = कपड़ा धोने वाले के **नीलभाण्डे** = नील के हौज (नाद) में। **नगरोपान्ते** = शहर के समीप **आत्मानम्** = अपने शरीर को **उत्तमवर्णः** = अच्छे रंग का **स्वकीयोत्कर्षम्** = अपनी उन्नति (लाभ) को **साधयामि** = सिद्ध करूँ। **आलोच्य** = विचार करके **आहूय** = बुलाकर **अभिषिक्तवती** = अभिषेक किया है **आधिपत्यम्** = अधीनता **शनैः-शनैः** = धीरे धीरे **केनचिद्** = किसी के द्वारा। **यतः** = क्योंकि **विप्रलब्धाः** = ठगे गये (वंचित) **सम्मिल्य** = मिलकर **एकदैव** = एक साथ **महारावम्** = ऊँची आवाज **शब्दम्** = आवाज **दुरतिक्रमः** = दुर्निवार, जिसका निवारण कठिन हो।

**श्लोकार्थ-जिसका जो स्वभाव होता है, उसका निवारण कठिन है।**

**1. उच्चारणं कुरुत पुस्तिकायां च लिखत-**

कस्ंिमश्चिद्,स्वेच्छया, कुक्कुरेभ्यः, स्वकीयोत्कर्षम्,अभिषिक्तवती,अस्मदाज्ञया,व्याघ्रादिभिः,सम्मिल्य,यस्यास्ति, इत्यनेनैव, व्याघ्रादयः।

**2. एकपदेन उत्तरत-**

(क) शृगालः कुत्र वसति स्म?

(ख) तस्य आधिपत्यं के स्वीकृतवन्तः?

(ग) सर्वे शृगालाः सायंकाले किम् अकुर्वन्?

(घ) सिंहः कं हतवान् ?

**3. एकवाक्येन उत्तरत-**

(क) नीलवर्णः शृगालः किम् अचिन्तयत् ?

(ख) वृद्धशृगालेन किं प्रतिज्ञातम् ?

(ग) नीलवर्णः शृगालः किम् उक्तवान् ?

**4. मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत-**

**पतितः, शृगालः , दुरतिक्रमः, वनदेवता।**

(क) कस्ंिमश्चिद् अरण्ये एकः ........ वसति स्म।

(ख) स रजकस्य नीलभाण्डे ...........।

(ग) भगवती ........ स्वहस्तेन अरण्यराज्ये अभिषिक्तवती।

(घ) य स्वभावो हि यस्यास्ति स नित्यम् ....।

**5. वाक्यानि रचयत-**

प्रतिवसति स्म, महारावम्, शनैः-शनैः, नीलभाण्डे

**6. संस्कृतभाषायाम् अनुवादं कुरुत-**

(क) एक बार वह नील के पात्र में गिर गया।

(ख) सभी वनवासियों ने उसका आधिपत्य स्वीकार कर लिया।

(ग) सभी ऊँची आवाज करने लगे।

<u>7.हिन्दीभाषायाम् अस्याः कथायाः अनुवादं कृत्वा पुस्तिकायां लिखत।</u>

**शिक्षण-सङ्केतः**

1. पाठसदृशीम् अन्यां कथां श्रावयत।